दिनाङ्क :- 08.09.2025

प्रात: - 06:55

प्रधानमन्त्री-यात्रा

प्रधानमन्त्री नरेन्द्रमोदी श्व: जलप्लावनस्य स्थितिं समीक्षितुं पञ्जाब्-राज्यं गमिष्यति। सः व्यक्तिगतरूपेण स्थानीय-स्थित्याः मूल्याङ्कनं करिष्यति तथा च प्रभावितानां जनानां अधिकतमं साहाय्यं सुनिश्चेतुं वास्तविकतां अवगच्छति इति अपेक्ष्यते। पञ्जाब्-भाजपा-अध्यक्षः सुनील् जाखर् इत्येषः सोशल मीडिया सन्देशे अस्याः यात्रायाः पुष्टिम् अकरोत्। सः अवदत् यत् प्रधानमन्त्री सङ्कटकालस्य विषये अतीव चिन्तितः अस्ति, घटनाक्रमस्य निरीक्षणं च निकटतया कुर्वन् अस्ति। श्रीजाखरः पुनरुक्तवान् यत् भारतसर्वकारः पञ्जाब राज्यस्य जनैः सह दृढतया स्थितः अस्ति। केन्द्रीय कृषि मन्त्री शिवराज् सिङ्घ् चौहानः परिस्थितिं समीक्षितुं राज्यस्य यात्राम् अकरोत्। एतदतिरिच्य, जलप्लावेन जातस्य क्षतेः मूल्याङ्कनं कर्तुं द्वे केन्द्रीय अन्तामन्त्रालयीय-दले नियुक्तौ। अत्रान्तरे पञ्जाब्-राज्ये स्थितिः क्रमेण नियन्त्रणे आगच्छति। अद्यावधि राज्ये प्रायः षड्चत्वारिंशत् जनाः मृत्युमुपगताः तत्र विभिन्नानि दलानि विशेषज्ञैः सह सामूहिकरूपेण परस्परं साहाय्योद्धार कार्ये संलग्नानि सन्ति। प्रायः द्विसहस्र ग्रामाः, सप्ताशीति सहस्राधिक त्रिलक्षाधिकाः जनाः च जलप्लावनेन प्रभाविताः सन्ति। राज्यस्य प्रशासनेन मङ्गलवासरात् राज्यस्य सर्वाः शैक्षणिकसंस्थाः उद्घाटिताः भविष्यन्ति इति घोषितम्।

------

भाजपा-कार्यशाला

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां भाजपेति दलस्य सदस्यानां प्रशिक्षणकार्यक्रमस्य समापनसत्रं संबोधयिष्यति। श्वः आयोक्ष्यमाणे उपराष्ट्रपतिनिर्वाचनस्य मतदानप्रक्रियायाः विषये संसद-सदस्यानां कृते मूलभूतप्रशिक्षणं प्रदातुं संसद-परिसरस्य बालयोगी-प्रेक्षागृहे ह्यः द्विदिवसीया कार्यशाला आरब्धा। कार्यशालायाः प्रथमदिवसस्य अनन्तरं प्रसारमाध्यमैः सह वार्तालापं कुर्वन् संसदीयकार्यमन्त्री किरेन रिजिजुः अवदत् यत्, सर्वेषु प्रशिक्षण-सत्रेषु प्रधानमन्त्री उपस्थितः आसीदिति। श्री रिजिजूः अवदत् यत् एन्. डी. ए. दलानां सांसदाः अपि अद्य कार्यशालायां सम्मिलिताः भविष्यन्ति।

-----

सर्वोच्चन्यायालय:/वाद श्रवणम्

सर्वोच्चन्यायालयः अद्य निर्वाचन-आयोगस्य जून मासस्य चतुर्विंशति दिनाङ्के निर्वाचन-सूच्यां विशेष-गहन-संशोधनस्य निर्णयस्य विरूद्धे प्राप्त याचिकासु विचारं करिष्यति। न्यायमूर्ति सूर्यकान्त:, न्यायमूर्ति जॉयमाल्या बाग्ची इत्येतयोः पीठं (आर्. जे. डी.) इति राष्ट्रिय-जनता-दलस्य, (ए. आई. एम्. आई. एम्.) इति ऑल-इंडिया-मजलिस-ए-इत्तेहादुल-मुस्लिमीन इत्यादीनां दलानां तथा अन्येषां याचिकाकर्तृणां याचिकासु विचारं करिष्यति।

---

ऋतु-विभागः

भारत-ऋतु-विभागेन अद्य गुजरात-राजस्थानयोः पृथक्-पृथक् स्थानेषु अतिवृष्टेः पूर्वानुमानं कृतम्। विभागस्य अनुसारं मध्यप्रदेशे, ओडिशा-राज्ये, उपहिमालयी-पश्चिमवङ्गे, सिक्किम्-राज्ये, तमिलनाडु-प्रदेशे, पुदुचेरी-प्रदेशे, करैकले, उत्तराखण्डे च अद्य प्रचण्डवृष्टिः भविष्यति। आगामिषु त्रिषु दिनेषु जम्मू, हिमाचलप्रदेश, पञ्जाब्, मध्यप्रदेश् इत्येतेषु प्रदेशेषु अपि लघुतः मध्यमः वर्षा भवितुम् अर्हति। ऋतु विभागस्यानुसारम् अद्य आन्ध्रप्रदेशे, बिहार्-राज्ये, कर्णाटके, झारखण्डे, केरल-राज्ये, माहे-प्रदेशे, तेलङ्गाना-राज्ये च विद्युद्योतनेन सह वृष्टिः भविष्यति।

-----

एशिया कप

हॉकीति क्रीडायां भारतेन बिहारस्य राजगीरे दक्षिण कोरिया दलं चत्वारि-एकम् इत्यंकान्तरालेन पराजित्य चतुर्थं बारं पुरूष-एशिया-कप स्पर्धा-विजिता। भारतीय-पुरुष-हाकी-दलस्य भव्यविजयाय प्रधानमन्त्रिणा नरेन्द्रमोदिना वर्धापितम्। एकस्मिन् सोशल मीडिया सन्देशे श्रीमोदी अवदत् यत् एतत् विजयं इतोऽपि विशिष्टम् अस्ति यतः ते गतविजेतारं दक्षिणकोरिया-दलं पराजितवन्तः इति। भारतीय-हाकीति क्रीडायाः कृते, भारतीय-क्रीडायाः कृते च अयं गौरवपूर्णः क्षणः अस्ति इति प्रधानमन्त्रिणा उक्तम् ।

----

विश्वधनुर्प्रतिस्पर्धा

विश्वधनुर्प्रतिस्पर्धायां भारतीय पुरुषयुगल वर्गेण ऐतिह्यं विरचितम्। दक्षिण कोरियायाः ग्वांगजू नगरे सञ्जाते विश्व चैंपियनशिप प्रतिस्पर्धायाः अन्तिमायां स्पर्धायां भारतीय दलेन फ्रांस दलं पराजित्य स्वकीयं प्रथमं स्वर्ण पदकं विजितम्।